# श्रीरामरहस्योक्ता हनुमदष्टोत्तरशतनामावलिः

Shri Hanumad Ashtottarashata Namavali from Ramarahasya

sanskritdocuments.org

April 25, 2019

# Shri Hanumad Ashtottarashata Namavali from Ramarahasya

# श्रीरामरहस्योक्ता हनुमदष्टोत्तरशतनामावलिः

## Sanskrit Document Information

Text title : Shri Hanumad Ashtottarashata Namavali from Ramarahasya

File name : hanumadaShTottarashatanAmAvaliH10.itx

Category : hanumaana, aShTottarashatanAmAvaliH, nAmAvaliH

Location : doc_hanumaana

Transliterated by : Shree Devi Kumar shreeshrii at gmail.com

Proofread by : Shree Devi Kumar shreeshrii at gmail.com

Description/comments : from Ramarahasya, in Rama Bhakti Kalpalata Part 1

Latest update : April 25, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 25, 2019

*sanskritdocuments.org*

# श्रीरामरहस्योक्ता हनुमदष्टोत्तरशतनामावलिः

। श्रीरामो जयति ।
ॐ हनुमते नमः ।
ॐ अञ्जनासूनवे नमः ।
ॐ धीमते नमः ।
ॐ केसरिनन्दनाय नमः ।
ॐ वातात्मजाय नमः ।
ॐ वरगुणाय नमः ।
ॐ वानरेन्द्राय नमः ।
ॐ विरोचनाय नमः ।
ॐ सुग्रीवसचिवाय नमः ।
ॐ श्रीमते नमः । १०
ॐ सूर्यशिष्याय नमः ।
ॐ सुखप्रदाय नमः ।
ॐ ब्रह्मदत्तवराय नमः ।
ॐ ब्रह्मभूताय नमः ।
ॐ ब्रह्मर्षिसन्नुताय नमः ।
ॐ जितेन्द्रियाय नमः ।
ॐ जितारातये नमः ।
ॐ रामदूताय नमः ।
ॐ रणोत्कटाय नमः ।
ॐ सञ्जीवनीसमाहर्त्रे नमः । २०
ॐ सर्वसैन्यप्रहर्षकाय नमः ।
ॐ रावणाकम्प्यसौमित्रिनयनस्फुटभक्तिमते नमः ।
ॐ अशोकवनिकाच्छेदिने नमः ।
ॐ सीतावात्सल्यभाजनाय नमः ।

ॐ विषीदद्भूमितनयाऽर्पितरामाङ्गुलीयकाय नमः ।
ॐ चूडामणिसमानेत्रे नमः ।
ॐ रामदुःखापहारकाय नमः ।
ॐ अक्षहन्त्रे नमः ।
ॐ विक्षतारये नमः ।
ॐ तृणीकृतदशाननाय नमः ।
ॐ कुल्याकल्पमहाम्भोधये नमः ।
ॐ सिंहिकाप्राणनाशनाय नमः ।
ॐ सुरसाविजयोपायवेत्त्रे नमः ।
ॐ सुरवरार्चिताय नमः ।
ॐ जाम्बवन्नुतमाहात्म्याय नमः ।
ॐ जीविताहतलक्ष्मणाय नमः ।
ॐ जम्बुमालिरिपवे नमः ।
ॐ जम्भवैरिसाध्वसनाशनाय नमः ।
ॐ अस्त्रावध्याय नमः ।
ॐ राक्षसारये नमः । ४०
ॐ सेनापतिविनाशनाय नमः ।
ॐ लङ्कापुरप्रदग्ध्रे नमः ।
ॐ वालानलसुशीतलाय नमः ।
ॐ वानरप्राणसन्दात्रे नमः ।
ॐ वालिसूनुप्रियङ्कराय नमः ।
ॐ महारूपधराय नमः ।
ॐ मान्याय नमः ।
ॐ भीमाय नमः ।
ॐ भीमपराक्रमाय नमः ।
ॐ भीमदर्पहराय नमः । ५०
ॐ भक्तवत्सलाय नमः ।
ॐ भर्त्सिताशराय नमः ।
ॐ रघुवंशप्रियकराय नमः ।
ॐ रणधीराय नमः ।
ॐ रयाकराय नमः ।
ॐ भरतार्पितसन्देशाय नमः ।

ॐ भगवच्छ्लिष्टविग्रहाय नमः ।
ॐ अर्जुनध्वजवासिने नमः ।
ॐ तर्जिताशरनायकाय नमः ।
ॐ महते नमः । ६०
ॐ महामधुरवाचे नमः ।
ॐ महात्मने नमः ।
ॐ मातरिश्वजाय नमः ।
ॐ मरुन्नुताय नमः ।
ॐ महोदारगुणाय नमः ।
ॐ मधुवनप्रियाय नमः ।
ॐ महाधैर्याय नमः ।
ॐ महावीर्याय नमः ।
ॐ मिहिराधिककान्तिमते नमः ।
ॐ अन्नदाय नमः । ७०
ॐ वसुदाय नमः ।
ॐ वाग्मिने नमः ।
ॐ ज्ञानदाय नमः ।
ॐ वत्सलाय नमः ।
ॐ वशिने नमः ।
ॐ वशीकृताखिलजगते नमः ।
ॐ वरदाय नमः ।
ॐ वानराकृतये नमः ।
ॐ भिक्षुरूपप्रतिच्छन्नाय नमः ।
ॐ अभीतिदाय नमः । ८०
ॐ भीतिवर्जिताय नमः ।
ॐ भूमीधरहराय नमः ।
ॐ भूतिदायकाय नमः ।
ॐ भूतसन्नुताय नमः ।
ॐ भुक्तिमुक्तिदाय नमः ।
ॐ भूम्ने नमः ।
ॐ भुजनिर्जितराक्षसाय नमः ।
ॐ वाल्मीकिस्तुतमाहात्म्याय नमः ।

ॐ विभीषणसुहृदे नमः ।
ॐ विभवे नमः । ९०
ॐ अनुकम्पानिधये नमः ।
ॐ पम्पातीरचारिणे नमः ।
ॐ प्रतापवते नमः ।
ॐ ब्रह्मास्त्रहतरामादिजीवनाय नमः ।
ॐ ब्रह्मवत्सलाय नमः ।
ॐ जयवार्ताहराय नमः ।
ॐ जेत्रे नमः ।
ॐ जानकीशोकनाशनाय नमः ।
ॐ जानकीरामसाहित्यकारिणे नमः ।
ॐ जनसुखप्रदाय नमः । १००
ॐ बहुयोजनगन्त्रे नमः ।
ॐ बलवीर्यगुणाधिकाय नमः ।
ॐ रावणालयमर्दिने नमः ।
ॐ रामपादाब्जवाहकाय नमः ।
ॐ रामनामलसद्वक्त्राय नमः ।
ॐ रामायणकथाऽऽदृताय नमः ।
ॐ रामस्वरूपविलसन्मानसाय नमः ।
ॐ रामवल्लभाय नमः । १०८

इति श्रीरामरहस्योक्ता श्रीहनुमदष्टोत्तरशतनामावलिः समाप्ता ।

असुकरलाभैर्ग्रन्थैरमुद्रितै रघ्ययावदतिरस्यैः ।
महिततनुर्वहतु मुदं मनसि सतां रामभक्तिकल्पलता ॥

Encoded and proofread by Shree Devi Kumar shreeshrii at gmail.com

*Shri Hanumad Ashtottarashata Namavali from Ramarahasya*
pdf was typeset on April 25, 2019

Please send corrections to *sanskrit@cheerful.com*